# DELHI PUBLIC SCHOOL , DURGAPUR

## QUESTION BANK & REVISION SHEET FOR SA-I (2018-19)

## SANSKRIT (2ND LANG.) CLASS - IX

### खण्ड : [क] [अपठित -अवबोधनम्]

. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत
अस्माकं भारतदेशं धन्यम् अस्ति | एतत् देशं पवित्रं अपि च अस्ति | अस्य देशस्य विविधा संस्कृतिः सर्वेषां चित्तं प्रसन्नं करोतिः पापानां च नाशं करोति पुण्याय च प्रेरयति |पापनाशिनी गङ्गा अस्यां धरायाम् एव वहति| सिंधु नर्मदा च अस्य प्राकृतिकं सौन्दर्यं द्विगुणी कुरुतः | धन्या सरस्वती वन्दनीया यमुना , कृष्णा अपि अत्र एव वहन्ति | अस्मिन् पवित्र देशे वयं पवित्राः वेदमन्त्राः श्रृणुमः | भारतवर्ष न केवलं नदीभिः मण्डितम् अपितु अत्र बहवः रम्याः पर्वताः सन्ति | यत्र गुहासु ऋषयः मुनयः च स्वाध्यायं कुर्वन्ति | उत्तर भारते रमणीयः कैलाशः हिमालयः च विराजते |अन्ये अपि विन्ध्य सतपुडा-अरावली पर्वतमाला च अस्य देशस्य सौन्दर्यं वर्धते |

**I.** एकपदेन उत्तरत -

**i.** अस्मिन् देशे वयं कीदृशाः वेदमंत्राः श्रृणुमः **?**

**ii.** यमुना , कृष्णा , सरस्वती कुत्र वहन्ति **?**

**II.** पूर्णवाक्येन उत्तरत -

**i.** धन्यं कः अस्ति **?**

**ii.** के भारतदेशस्य सौंदर्यं द्विगुणी कुरुतः **?**

**III.** भाषिककार्यम्

**i.** ' मुनयः' इत्यस्य कर्तृपदस्य क्रियापदं किम् **?**

क. स्वाध्यायं ख. कुर्वन्ति ग. यत्र घ. गुहासु

**ii.** ' श्रृणुमः' क्रियायाः कर्तृपदं किम् **?**

क. अस्मिन् ख. वयम् ग. पवित्रा घ. देशे

**IV.** अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत **|**

अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -
एकस्मिन् वने एकः सिंहः अवसत् ।एकदा वने भ्रमन् सः श्रान्तः भूत्वा वृक्षस्य छायायाम् उपविष्टःअभवत् ।सिंहः तत्र निद्राम् अगच्छत्। अस्मिन् अवसरे कश्चित् मूषकः सिंहस्य शरीरे कूर्दित्वा तस्य निद्रा भङ्गम् अकरोत्।अतः सः सिंहः क्रुद्धः भूत्वा तं मूषकं मारयितुम् उद्यतः अभवत्।भयभीतः मूषकः प्राणरक्षायै बहुधा सिंहं निवेदितवान् । सिंहः अपि तस्मिन् मूषके दयां कृत्वा तम् अमुञ्चत् । अतः उचितम् एव उक्तम् दया वीरस्य भूषणम् इति ।

I. एकपदेन उत्तरत -

**[क]** कः मूषकं मारयितुम् उद्यतः अभवत् ?

**[ख]** सिंहः कुत्र भ्रमन् श्रान्तः अभवत् ?

II. पूर्णवाक्येन उत्तरत -

**[क]** वीरस्य भूषणं किं भवति ?

**[ख]** मूषकस्य पुनः पुनः निवेदनं श्रुत्वा सिंहः किम् अकरोत् ?

III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -

**[क]** तस्य निद्राभङ्गम् अकरोत् इत्यत्र अकरोत् इति क्रियापदस्य कर्तृपदं किम् ?

i) तस्य ii) सिंहस्य iii) मूषकः iv) निद्राभङ्गम्

**[ख]** निर्भीकः इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

i) बहुधा ii) प्राणरक्षायै iii) निवेदितवान् iv) भयभीतः

**[ग]** दयां कृत्वा तम् अमुञ्चत् इत्यत्र तम् इति सर्वनामपदं कस्मै प्रयुक्तम् ?

i) मूषकाय ii) सिंहाय iii) वनाय iv) वीराय

[घ] श्रान्तः इति कस्य विशेषणम् ?

i) मूषकस्य ii) वीरस्य iii) सिंहस्य iv) भूषणस्य

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत

## खण्ड- [ ख] [ रचनात्मककार्यम् ]

. परीक्षायाम् सफलतायै मित्रं लिखितं पत्रमिदं मञ्जूषायाः सहायतया पूरयत |

दिल्ली नगरात्

तिथिः 04.08.18

प्रिय मित्र ! (i) ------------------

परीक्षायां तव सफलतायाः (ii) ------------प्राप्य अहं (iii)--------- अस्मि | एतत् तव (iv) ---------- एव परिणामः यत् (v) -- ----------प्रथमस्यां श्रेण्याम् (vi)------------अभवत् | आशास्महे भवान् (vii) ---------- वर्षे अपि एतादृशम् एव परीक्षाफलं लप्स्यते | अस्यां सफलतायां भूयोभूयः (viii) ------------------ भवतु |

तव (ix)------------------

(x) ------------------

मञ्जूषा [परिश्रमस्य,अभिन्नं मित्रम्,भानुः,सर्वेश, समाचारपत्रम्,प्रसन्नः,उत्तीर्णः,भवान्,अग्रिमे,वर्धापनम् ]

.अधोदत्तंचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतयासंस्कृतेन पञ्चवाक्यानि रचयत-

मञ्जूषा -[ सूर्यः , वृक्षाः , वृषभौ , पुष्पाणि , कृषकः , उदेति, हलम् , कुटीरम् , विकसन्ति , कर्षति ]

अथवा

सौम्या नामधेया कन्या स्वविषये किं वदति इति अवधार्य क्रमशःपञ्च वाक्यानि संस्कृते लिखत -

मञ्जूषा - [अहर्निशं,मम,मातुः,दिव्या,नवम्याम् कक्षायां पठामि,मम प्रियःविषयः,मम नाम,अस्ति]

'पर्यावरणसंरक्षणम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत

मञ्जूषा -

| |
|---|
| जीवनस्य आधारः ,प्लास्टिकस्यूताः , स्वार्थान्धमानवाः, व्यापारवर्धनाय ,वृक्षारोपणम् ,महानगरेषु, मलिनम् , पक्षिणः , उद्योगानां , प्रदूषिता \| |

## खण्ड - [ग] [ अनुप्रयुक्त - व्याकरणम् ]

प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत् -

i. ---------------------- नियमाः पालानीयाः |

क. राजानः ख. राज्ञिः ग. राजभिः घ. राजभ्यः

ii. ---------------------- अत्र स्वागतम् अस्ति |

क. भवद्भ्यः   ख. भवन्तः   ग. भवत्सु   घ. भवताम्

iii. गोष्ठ्यां ------------------------ आमन्त्रितं कुरू ।

क. विद्वान्   ख. विदुषाम्   ग. विद्वांसम्   घ. विदुषा

iv शनैः -शनैः ---------------------- जनाः अपि लक्ष्यं प्राप्नुवन्ति ।

क. गच्छन्तः   ख. गच्छताम्   ग. गच्छतौ   घ. गच्छन्

v. -------------------------------- अजरः अमरः चास्ति ।

क. आत्मान्   ख. आत्मनः   ग. आत्मा   घ. आत्मानौ

vi प्रजा --------------------------- विश्वसिति ।

क. राज्ञि   ख. राजानाम्   ग. राज्ञः   घ. राज्ञा

प्रदत्तविकल्पेभ्यः उचितम् संख्यावाचकं पदं चित्वा वाक्यानि पूरयत -

i. सरोवरे --------------------- मत्स्याः वसन्ति ।

क. त्रयः   ख. त्रीणि   ग. तिस्रः   घ. त्रयाणाम्

ii. ------------------------------ वने एकः दुस्टः सिंहः वसति स्म् ।

क. एके   ख. एकम्   ग. एकस्मिन्   घ. एकाम्

**iii.**सर्वे ---------------------- हस्ताभ्याम् कार्यं कुर्वन्ति **।**

क. द्वाभ्याम्   ख. द्वे   ग. द्वयोः   घ. दौ

iv. राजा दशरथस्य -------------------- पुत्राः आसन् ।

क. चत्वारः   ख. चत्वाराः   ग. चतुरः   घ. चतस्रः

v.कालिदासस्य ------------------- महाकाव्ये स्तः ।

क. दौ   ख. द्वे   ग. द्वाः   घ. द्वयोः

vi.सरोवरे ------------------------- बालिकाः तरन्ति ।

क. पञ्चाः   ख. पञ्च   ग. पञ्चम्   घ. पञ्चमिः

. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत् -

i. सः कार्यं --------------------------------- ।

क. कुर्यात्   ख. कुर्याव   ग. कुर्याम्   घ. कुर्यामि

ii. जनाः उत्सवे मिष्टान्नम् ----------------- ।

क. भक्षयेत्   ख. भक्षयेयुः   ग. भक्षयन्तु   घ. भक्षयेयम्

Iii. जनकः स्वपुत्रे न ------------------------- ।

क. क्रुध्ये   ख. क्रुध्येव   ग. क्रुध्येत्   घ. क्रुध्येताम्

iv. बालकाः शिशुगीतानि श्रृणवन्तः ---------- ।

क. मोदेत   ख. मोदेरन्   ग. मोदन्ताम्   घ. मोदेयुः

v. तुभ्यम् इदं फलं ----------------------- ।

क. रोचताम्   ख. रोचेताम्   ग. रोचन्ताम्   घ. रोचस्व

vi. अम्बा पाकशालायां भोजनं ------------- ।

क. पचताम्   ख. पचतु   ग. पचेयम्   घ. पचाव

. प्रदत्तविकल्पेभ्यः उचितानि पदानि चित्वा वाक्यानि पूरयत -

i. मम -------------------------------- समया नदी अस्ति ।

क. गृहम् ख. गृहस्य ग. गृहात् घ. गृहे

ii. तया ------------------- प्रयोजनं नास्ति या न लिखति ।

क. लेखन्या ख. लेखन्याः ग. लेखनीभ्यः घ. लेखनीम्

iii. ---------------------------------------- सैनिकाः अलम् ।

क. देशाद्रोहिंनः ख. देशद्रोहिनेण ग. देशद्रोहिणे घ. देशद्रोहिणाय

iv. ---------------------------------- न प्रमदितव्यम् ।

क. मातृसेवाम् ख. मातृसेवास्य ग. मातृसेवायाः घ. मातृसेवायाम्

v. ----------------------- विना राजा किं करिष्यति ?

क. राज्यम् ख. राज्यस्य ग. राज्याय घ. राज्यः

vi. ------------------------------ न कोऽपि विश्वसिति ।

क. धूर्ते ख. धूर्तम् ग. धूर्तात् घ. धूर्तस्य

अधोलिखितानां प्रश्नानां समुचितम् उत्तराणि विकल्पेभ्यः चित्वा लिखत -

i ऋ वर्णस्य उच्चारणस्थानं किम् ? क. मूर्धा ख.कण्ठः ग. तालुः घ. दन्ताः

ii घ् वर्णस्य उच्चारणस्थानं किम् ? क. कण्ठः ख. नासिका ग. मूर्धा घ. औष्ठौ

iii प् वर्णस्य उच्चारणस्थानं किम् ? क. कण्ठः ख. नासिका ग. मूर्धा घ. औष्ठौ

iv वर्णसंयोजनेन पदनिर्माणं विकल्पेभ्यः चित्वा क्रियताम् -

(क) क् + अ + म् + अ + ल् + अ + म् = —क. कमलाम् ख. कलमम् ग. कामलम् घ. कमलम्

**(ख)** व्+ इ +च् +छ् +ए +द् +अ + म् = -- क. विच्छादम् ख. विच्छेदाम् घ. विच्छेदम् घ.विछेदम्

## खण्ड –[घ] [पठित –अवबोधनम्]

**अधोलिखितम् पठितम् गद्यांशः पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत -**

<u>गद्यांशः</u>

**पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत् । तस्याः च एका दुहिता विनम्रा मनोहरा च आसीत् । एकदा माता स्थाल्यां ताण्डुलान्निक्षिप्य पुत्रीम् आदिदेश – सूर्यातपे तण्डुलान् खगेभ्यो रक्ष । किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तामुपाजगाम । न एतादृशः स्वर्ण पक्षो रजतचञ्चुः स्वर्णकाकः तया पूर्वं दृष्टः ।**

I **एकापदेन उत्तरत –**

i) **वृद्धा स्त्री कीदृशी आसीत्** ? ii) **वृद्धायाः कीदृशी दुहिता आसीत्** ?

II **पूर्णवाक्येन उत्तरत -**

i) पुत्रीं माता किम् आदिदेश ? ii) किञ्चित् कालादनन्तरम् किम् अभवत् ? iii) **काकः कीदृशः आसीत्** ?

**अधोलिखितम् पद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत -**

<u>पद्यांशः</u>

निनादय नवीनामये वाणि ! वीणाम्
मृदुं गाय गीतिं ललित –नीति –लीनाम् ।

I **एकापदेन उत्तरत –**

i) **वाणी कीदृशीं वीणां निनादयतु** ? ii) **सा कीदृशीं गीतिं गायतु** ?

II **पूर्णवाक्येन उत्तरत -**

i) अस्मिन् **श्लोके** कविः वाणीं कीदृशञ्च गातुं प्रार्थयति ? ii) कवेः अनुसारं सरस्वती (वाणी) का निनादयतु ?

iii) **अत्र श्लोके ' सरस्वती ' इत्यस्य पदस्य अर्थे किं पर्याय पदं प्रयुक्तम्** ?

<u>नाट्यांशः</u>

( ततः प्रविशति साटोपं कोपं निरूपयन्ती श्वश्रूः)

विमला – अम्ब ! किमादिशति ?

श्वश्रूः – (विडम्बयन्ती) किमादिशसि ? **किमिदानीमपि महादेव्याः प्रभातकालो न सञ्जातः** ?

विमला – प्रातः कालिकं कार्यजातमेव समपादयामि ।

श्वश्रूः – प्रातः कालिकं कार्यजातं सम्पादसि । इदानीमपि चायपेयस्य नास्ति कापि कथा । तव पिता आगत्य साधयिष्यति किं चायं ---- येन काकिणी अपि न दत्ता --

विमला - मम् पितृपादम् किमर्थं कदर्थयसि अम्ब ! यत्लिमपि कथनीयं मा प्रत्येव कतय ।

श्वश्रूः - (सभ्रूभङ्गं सभुजक्षेपं च)(अय् हय् ) श्रृणुत अस्याः दुष्टायाः अधरोत्तरम् । एतावानेन प्रियो यदि पिता तर्हि तत्रैव गत्वा कथं न मृता पितु गृहे ....?

I **एकापदेन उत्तरत –**

i) **विमला कीदृशं कार्यजातं सम्पादयति** ? ii) **विमलायाः** श्वश्रूः किमर्थं कदर्थयति ?

II **पूर्णवाक्येन उत्तरत -**

i) श्वश्रू –अनुसारम् इदानीमपि कः न सञ्जातः ? ii) संवादस्य अन्तिमे वाक्ये श्वश्रूः किम् उक्त्वा विमलाम् आक्षिपति ?

iii) **संवादे ' सञ्जातः ' इति क्रियायाः कर्तृपदं किम्** ?

अधोलिखित श्लोकस्य अन्वयं मञ्जूषातः उचितं पदं चित्वा पूरयत-

मधुर – मञ्जरी –पिञ्जरी –भूतमालाः
वसन्ते लसन्तीह सरसा रसालाः,
कलापाःललित –कोकिला –काकलीनाम् ॥

अन्वयः - इह ( ) ------------------- मधुर –मञ्जरी –पिञ्जरी ( ) ----------------- सरसाः रसालाः ( ) -------------------।

ललित ( ) --------------------------- काकलीनां कलापाः (शोभन्ते) ।

मञ्जूषा – [ कोकिला , **भूतमालाः** , **वसन्ते**, **लसन्ति** ]

रेखांकित पदान् अधिकृत्य प्रश्ननिर्माणं कुरुत –

क. ग्रामे <u>**निर्धना स्त्री**</u> अवसत् ।
ख. <u>**स्वर्णकाकं**</u> निवारयन्ती बालिका प्रार्थयत् ।
ग. <u>**सूर्योदयात्**</u> पूर्वमेव बालिका तत्र उपस्थिताः ।

घ. बालिका **निर्धनमातुः** गुहिता आसीत् ।
ङ. लुब्धा वृद्धा **स्वर्णकाकस्य** रहस्यम् अभिज्ञातवती ।

क स्तम्भे पदानि , **ख स्तम्भे तेषां पर्यायपदानि दत्तानि । तानि चित्वा पदानां समक्षे लिखत -**

| क स्तम्भः | ख स्तम्भः |
|---|---|
| क) सरस्वती | i) तीरे |
| ख) आम्रम् | ii) समीरः |
| ग) पवनः | iii) रसालः |
| घ) तटे | iv) वाणी |

| | |
|---|---|
| खण्ड -क अपठित -अवबोधनम् - | **10** |
| खण्ड- ख रचनात्मककार्यम् - **[** पत्रलेखनम् , चित्रवर्णनम् **]** | **15** |
| खण्ड- ग अनुप्रयुक्त-व्याकरणम् -**[वर्णमाला**, सन्धि ,प्रत्यय**,** उपसर्ग , शब्दरुप , **धातुरुप**, **उपपद विभक्ति]** | 25 |
| खण्ड -घ पठित -अवबोधनम् - **[**गद्यांशम् ,पद्यांशम् ,नाट्यांशम् ,अन्वयं,प्रश्ननिर्माणम्,कथाक्रमानुसारम्**]** | **3**0 |